# Manjistha

योजनवल्ली विकसा मञ्जिष्ठा रक्तयष्टिका रक्ता ।
मञ्जी यूथी काला भाण्डकरी कालमेषी च ॥
अरुणाङ्गा च समङ्गा रक्ताङ्गी वस्त्रभूषणी विजया ।
ताम्री नागकुमारी द्विषाद्विषा मञ्जतालका लोला ॥
मुक्तिका चन्द्रहासा च पद्मिका ज्वरनाशिनी ।
मञ्जुला चेति कथिता शब्दैः पर्यायवाचकैः ॥ **(Aa ma)**

Yojanavalli, Vikasa, Manjistha, Raktayastika, Rakta, manji, Yuthi, Kala, Bhandakari, Kalameshi, Arunanga, Samanga, Raktangi, Vastrabhushani, Vijaya, Tamri, Nagakumari, Dvisha dvisha, Manjatalaka, Lola, Muktika, candahasa, Padmika, Jvaranasini, Manjula - are the synonyms for Manjishta.

मञ्जिष्ठा विकसा जिङ्गा समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्यपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जुषा वस्त्ररञ्जिनी ॥ **(Bpn)**

Manjistha, Vikasa, Jingi, Samanga, Kalamesika, Mandukaparni, Bhandiri, Bhandi, Yojanavalyapi, Rasayani, Aruna, Kala, raktangi, Raktayastika, Bhanditaki, Gandiri, Manjusha, Vastraranjini- these are the synonyms for Manjistha.

मञ्जिष्ठा हरिणी रक्ता गौरी योजनवल्लिका ।
समङ्गा विकसा पद्मा रोहिणी कालमेषिका ।
भण्डी चित्रलसा चित्रा चित्राङ्गी जननी च सा ॥
मण्डूकपर्णी विजया मञ्जूषा रक्तयष्टिका ।

क्षेत्रिणी चैव रागाढ्या भण्डीरी कालभण्डिका ॥
अरुणा ज्वरहन्त्री च छद्मा नागकुमारिका ।
भाण्डीरलतिका चैव रागाङ्गी वस्त्रभूषणा ॥
त्रिशाह्वया तथा प्राक्तो मञ्जिष्ठा च भिषग्वरैः ॥ **(Rjn)**

Manjistha is otherwise called Harini, Rakta, Gauri, Yojanavallika, Samanga, Vikasa, Padma, Rohini, Kalamesika, Bhandi, Citralata, Citra, Citrangi, Janani, Mandukaparni, Vijaya, Manjusha, Raktayastika, Ksetrini, ragadhya, Bhandiri, Kalabhandika, Aruna, Jvarahantri, Chadma, Nagakumarika, Bhandiralatika, Ragangi, Vastrabhushana.

मञ्जिष्ठा लोहिता रक्ता रक्ताङ्गी रक्तयष्टिका ।
छद्मका मञ्जुला भण्डी भण्डीरा ताम्रवल्यपि ॥
समङ्गा विकसा ताम्रा विजया वस्त्रभूषणा ।
ताम्रमूला कालमेषी जिङ्गी योजनवल्लिका ॥ **(Kdn)**

Manjistha is other wise called Lohita, Rakta, Raktangi, Raktayastika, Chadmaka, Manjjula, Bhandi, Bhandira, Tamravalya, Samanga, Vikasa, Tamra, Vijaya, Vastrabhushana, Tamramula, Kalamesi, Jingi, Yojanavallika.

तिक्ता कषाया कुष्ठघ्नी विसर्पज्वरनाशिनी ।
रक्तातिसारशमनी मञ्जिष्ठा योनिदोषजित् ॥ **(Mdn)**

Manjistha is Tikta, Kashaya in Rasa, Kusthaghna, Visarpa-Jvara nasini, Rakta atisara samani, and Yoni dosha hara.

मञ्जिष्ठा मधुरा तिक्ता कषाया स्वरवर्णकृत् ।
गुरुरुष्णा विषश्लेष्मशोफयोन्याक्षिकर्णरुक् ॥

रक्तातिसारकुष्ठास्रवीसर्पव्रणमेहनुत् । **(Bpn)**

Manjistha is Madhura, Tikta, Kashaya in Rasa, Svara varna kara, Guru in Guna, Usna in Potency, cures Visa, Slesma, Sopha, Yoni sula, Aksi sula, Karna sula, Rakta atisara, Kustha, Asra vikara, Visarpa, Vrana and Meha.

मञ्जिष्ठा मधुरा स्वादे कषायोष्णा गुरुस्तथा ।
कफोग्रव्रणमेहास्रविषनेत्रामयाञ्जयेत् ॥ **(Dhn)**

Manjistha is Madhura , Kashaya in Rasa, Usna in Potency, Guru in Guna, cures Kapha agra, Vrana, Meha, Asra vikara, Visa, Netra amaya.

मञ्जिष्ठा मधुरा स्वादे कषायोष्णा गुरुस्तथा ।
व्रणमोहज्वरश्लेष्मविषनेत्रामयापहा ॥ **(Rjn)**

Manjistha is Madhura, Kashaya in Rasa, Usna in Potency, Guru in Property, cures Vrana, Moha, Jvara, Slesma, Visa,and Netramaya.

मञ्जिष्ठा तुवरा तिक्ता स्वर्योष्णा मधुरा गुरुः ।
कर्णाक्षियोनिरोगघ्नी कफशोफविषापहा ॥
विसर्पमेहकुष्ठार्शोव्रणरक्तातिसाराजित् ।

शाकं स्वादु लघु स्निग्धं दीपनं वातपित्तजित् ॥ **(Kdn)**

Manjistha is Tuvara, Tikta in Rasa, Svarya, Usna in Potency, Madhura in Rasa, Guru in Guna, cures Karna-Aksi-Yoni roga, Kapha, Sopha, Visa, Visarpa, Meha, Kustha, Arsa, Vrana, Rakta Atisara.

Saka is Svadu in Rasa, Laghu, Snigdha in Guna, Dipana and Vata Pitta hara.

मञ्जिष्ठा कुष्ठवीसर्पशोफघ्नी वर्णदा परम् । **(Sdn)**

Manjistha is Kustha-Visarpa-Sopha ghna, Varnada para.

मञ्जिष्ठा मधुरा तिक्ता कषाया स्वर्णवर्णकृत् ।
गुरुरुष्णा विषश्लेष्मशोफयोन्यक्षिशूलनुत् ॥
रक्तातिसारकुष्ठास्रवीसर्पव्रणमेहजित् ।

तच्छाकं दीपनं स्वादु स्निग्धं पित्तानिलापहम् ॥ **(Mpn)**

Manjistha is Madhura, Tikta, Kashaya in Rasa, Svarna Varna kara, Guru in Guna, Usna in Potency, cures Visa, Slesma, Sopha, Yoni sula, Aksi sula, Rakta atisara, Kustha, Asra vikara, Visarpa, Vrana, Meha.

Its Saka is Dipana, Svadu in rasa, Snigdha in Guna, Pitta Anila hara.

मञ्जिष्ठा कुष्ठवैस्वर्यशोफघ्नी मूत्रकृच्छ्रजित् । **(Rav)**

Manjistha is Kustha-Vaisvarya-Sopha ghna, Mutrakrcchra hara.

मञ्जिष्ठा तुवरा चोष्ण वर्ण्या स्वर्या गुरुः स्मृता ।
तिक्ता लघ्वी च मधुरा व्रणमेहकफापहा ॥
विषं नेत्ररुजं शोफं योनिदोषं ज्वरं तथा ।
शूल कर्णरुजं चैव कुष्ठं चार्शःकृमीन् जयेत् ॥
रक्तातिसारवीसर्पनाशिनी च प्रकीर्त्तिता ।
शाके स्यान्मधुरा लघ्वी स्निग्धा दीप्तिकरा मता ॥
वातपित्तहरी चोक्ता ऋषिभिः सत्यवादिभिः । **(Nir)**

Manjistha is Tuvara in Rasa, Usna in Potency, Varnya, Svarya, Guru in Property, Tikta in Rasa, Laghu in Property, madhura in Rasa, Vrana-

Meha-Kapha hara, cures Visa, Netraruja, Sopha, yonidosha, Jvara, Sula, Karnaruja, Kustha, Arsa, Krmi, Rakta atisara, Visarpa.

Saka is Madhura in Rasa, Laghu, Snigdha in Guna, Diptikara, Vata Pitta hari.